# Nrisinhastotram from Garuda Purana

# નૃસિંહસ્તોત્રમ્ ગરુડપુરાણાન્તર્ગતમ્

## Document Information

Text title : nRisiMhastotram garuDapurANAnrgatam

File name : nRisiMhastotramgaruDapurANa.itx

Category : vishhnu, dashAvatAra, stotra, vishnu

Location : doc_vishhnu

Description-comments : Garudapurana 1.231.1-25 (some place it in 223rd or 236th adhyAya)

Latest update : November 27, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 27, 2021

*sanskritdocuments.org*

Nrisinhastotram from Garuda Purana

# નૃસિંહસ્તોત્રમ્ ગરુડપુરાણાન્તર્ગતમ્

સૂત ઉવાચ ।
નારસિંહસ્તુતિં વક્ષ્યે શિવોક્તં શૌનકાધુના ।
પૂર્વં માતૃગણાઃ સર્વે શઙ્કરં વાક્યમબ્રુવન્ ॥ ૧॥

ભગવન્ભક્ષયિષ્યામઃ સદેવાસુરમાનુષમ્ ।
ત્વત્પ્રસાદાજ્જગત્સર્વં તદનુજ્ઞાતુમર્હસિ ॥ ૨॥

શઙ્કરૌવાચ ।
ભવતીભિઃ પ્રજાઃ સર્વા રક્ષણીયા ન સંશયઃ ।
તસ્માદ્ઘોરતરપ્રાયં મનઃ શીઘ્રં નિવર્ત્યતામ્ ॥ ૩॥

ઇત્યેવં શઙ્કરેણોક્તમનાદૃત્ય તુ તદ્વચઃ ।
ભક્ષયામાસુરવ્યગ્રાસ્ત્રૈલોક્યં સચરાચરમ્ ॥ ૪॥

ત્રૈલોક્યે ભક્ષ્યમાણે તુ તદા માતૃગણેન વૈ ।
નૃસિંહરૂપિણં દેવં પ્રદધ્યૌ ભગવાઞ્છિવઃ ॥ ૫॥

અનાદિનિધનં દેવં સર્વભૂતભવોદ્ભવમ્ ।
વિદ્યુજ્જિહ્વં મહાદંષ્ટ્રં સ્ફુરત્કેસરમાલિનમ્ ॥ ૬॥

રત્નાઙ્ગદં સમુકુટં હેમકેસરભૂષિતમ્ ।
ખોણિસૂત્રેણ મહતા કાઞ્ચનેન વિરાજિતમ્ ॥ ૭॥

નીલોત્પલદલશ્યામં રત્નનૂપુરભૂષિતમ્ ।
તેજસાક્રાન્તસકલબ્રહ્માણ્ડોદરમણ્ડપમ્ ॥ ૮॥

આવર્તસદૃશાકારૈઃ સંયુક્તં દેહરોમભિઃ ।
સર્વપુષ્પૈર્યોજિતાઞ્ચ ધારયંશ્ચ મહાસ્ત્રજમ્ ॥ ૯॥

સ ધ્યાતમાત્રો ભગવાન્પ્રદદૌ તસ્ય દર્શનમ્ ।
યાદૃશેન રૂપેણ ધ્યાતો રુદ્રૈસ્તુ ભક્તિતઃ ॥ ૧૦॥

તાદૃશેનૈવ રૂપેણ દુર્નિરીક્ષ્યેણ દૈવતૈઃ ।
પ્રણિપત્ય તુ દેવેશં તદા તુષ્ટાવ શઙ્કરઃ ॥ ૧૧॥

શઙ્કર ઉવાચ ।
નમસ્તેઽસ્ત જગન્નાથ નરસિંહવપુર્ધર ।
દૈત્યેશ્વરેન્દ્રસંહારિનખશુક્તિવિરાજિત ॥ ૧૨॥

નખમણ્ડલસભિન્નહેમપિઙ્ગલવિગ્રહ ।
નમોઽસ્તુ પદ્મનાભાય શોભનાય જગદ્ગુરો ।
કલ્પાન્તામ્ભોદનિર્ઘોષ સૂર્યકોટિસમપ્રભ ॥ ૧૩॥

સહસ્રયમસંત્રાસ સહસ્રેન્દ્રપરાક્રમ ।
હસસ્ત્રધનદસ્ફીત સહસ્રચરણાત્મક ॥ ૧૪॥

સહસ્રચન્દપ્રતિમ ! સહસ્રાંશુહરિક્રમ ।
સહસ્રરુદ્રતેજસ્ક સહસ્રબ્રહ્મસંસ્તુત ॥ ૧૫॥

સહસ્રરુદ્રસંજપ્ત સહસ્રાક્ષનિરીક્ષણ ।
સહસ્રજન્મમથન સહસ્રબન્ધનમોચન ॥ ૧૬॥

સહસ્રવાયુવેગાક્ષ સહસ્રાજ્ઞકૃપાકર ।
સ્તુત્વૈવં દેવદેવેશં નૃસિંહવપુષં હરિમ્ ।
વિજ્ઞાપયામાસ પુનર્વિનયાવનતઃ શિવઃ ॥ ૧૭॥

અન્ધકસ્ય વિનાશાય યા સૃષ્ટા માતરો મયા ।
અનાદૃત્ય તુ મદ્વાક્યં ભક્ષ્યન્ત્વદ્ભુતાઃ પ્રજાઃ ॥ ૧૮॥

સૃષ્ટ્વા તાશ્ચ ન શક્તોઽહં સંહર્તુમપરાજિતઃ ।
પૂર્વં કૃત્વા કથં તાસાં વિનાશમભિરોચયે ॥ ૧૯॥

એવમુક્તઃ સ રુદ્રેણ નરસિહવપુર્હરિઃ ।
સહસ્રહેવીર્જિહ્વાગ્રાત્તદા વાગીશ્વરો હરિઃ ॥ ૨૦॥

તથા સુરગણાન્સર્વાન્રૌદ્રાન્માતૃગણાન્વિભુઃ ।
સંહૃત્ય જગતઃ શર્મ કૃત્વા ચાન્તર્દધે હરિઃ ॥ ૨૧॥

નારસિંહમિદં સ્તોત્રં યઃ પઠેન્નિયતેન્દ્રિયઃ ।
મનોરથપ્રદસ્તસ્ય રુદ્રસ્યેવ ન સંશયઃ ॥ ૨૨॥

ધ્યાયેન્નૃસિંહં તરુણાર્કનેત્રં સિતામ્બુજાતં જ્વલિતાગ્નિવક્ત્રમ્ ।

અનાદિમધ્યાન્તમજં પુરાણં પરાવરેશં જગતાં નિધાનમ્ ॥ ૨૩॥ (પરાપરેશં)

જપેદિદં સન્તતદુઃખજાલં જહાતિ નીહારમિવાંશુમાલી ।
સમાતૃવર્ગસ્ય કરોતિ મૂર્તિં યદા તદા તિષ્ઠતિ તત્સમીપે ॥ ૨૪॥

દેવેશ્વરસ્યાપિ નૃસિંહમૂર્તેઃ પૂજાં વિધાતું ત્રિપુરાન્તકારી ।
પ્રસાદ્ય તં દેવવરં સ લબ્ધ્વા અવ્યાજ્જગન્માતૃગણેભ્ય એવ ચ ॥ ૨૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નૃસિંહસ્તોત્રં નામૈકત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ ।

Garuda Purana 1,231.1-25

There are different versions of the purANa in print.

Some place it as 223rd or 236th adhyAya.

---

*Nrisinhastotram from Garuda Purana*

pdf was typeset on November 27, 2021

Please send corrections to *sanskrit@cheerful.com*